योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ११३

त्रयोदशोत्तरशततमः सर्गः ११३

श्रीराम उवाच ।

मिथ्यानरप्रसङ्गेन किं मायापुरुषः प्रभो ।

कथितोऽयं त्वया व्योमरक्षण च किमुच्यते ।। १

श्रीवसिष्ठ उवाच ।

श्रृणु राम यथाभूतमेतत्प्रकटयामि ते ।

मिथ्यापुरुषवृत्तान्तकथा या कथिताधुना ।। २

मायायन्त्रमयः प्रोक्तो यः पुमान्रघुनन्दन ।

एनं त्वं तमहंकारं विद्धि शून्याम्बरोत्थितम् ।। ३

यस्मिन्नाकाशकोशेऽस्मिन्साधो जगदिदं स्थितम् ।

तदनन्तमसच्छून्यं सर्गादौ भवति स्वयम् ।। ४

अन्तःस्थितसुदुर्लक्ष्यब्रह्म व्योम्नोऽथ शब्दवत् ।

तस्मादुदेत्यहंकारः पूर्वं स्पन्द इवानिलात् ।। ५

वृद्धिं यातः स गगने कल्पयत्यात्मतां गतः ।

अनात्मात्माभिधानेन तेनासौ यतते ततः ।। ६

अनात्मात्मैकरक्षार्थं देहान्नानाविधानसौ ।

भूयोभूयो विनाशेऽपि सृजत्याकुलतां गतः ।। ७

स एव मायापुरुषो मिथ्यापुरुष एव सः ।

असदेवोदितो व्यर्थोऽप्यहंकारो हि मायया ।। ८

कूपकुण्डचतुःशालकुम्भादीन्देहकानसौ ।

कृत्वा रक्षित आत्मेति याति तद्व्योम्नि भावनम् ।। ९

अहंकारस्य तस्यास्य नामानीमानि राघव ।

श्रृणु यैर्जगदाकारविभ्रमैर्मोहयत्यसौ ।। १०

जीवो बुद्धिर्मनश्चित्तं माया प्रकृतिरित्यपि ।

संकल्पः कलना कालः कला चेत्यपि विश्रुतैः ।। ११

एवमाद्यैस्तथान्यैश्च नामभिर्बहुतां गतैः ।

सहस्ररूपोऽहंकारः कल्पितार्थैर्विजृम्भते ।। १२

भूताकाशे तते शून्ये जगन्निर्भित्ति निश्चितम् ।

सुखदुःखान्यनुभवन्मिथ्यैव पुरुषः स्थितः ।। १३

यथैव मिथ्यापुरुषो रक्षन्व्योमात्मशङ्कया ।

घटाकाशादिषु क्लिष्ट एवं मा क्लेशवान्भव ।। १४

आकाशादपि विस्तीर्णः शुद्धः सूक्ष्मः शिवः शुभः ।

य आत्मा स कथं केन गृह्यते रक्ष्यतेऽथवा ।। १५

हृदयाकाशमात्रस्य शरीरक्षयसंक्षये ।

व्यर्थं भूतानि शोचन्ति नष्ट आत्मेति शङ्कया ।। १६

घटादिषु प्रणष्टेषु यथाकाशाद्यखण्डितम् ।

तथा देहेषु नष्टेषु देही नित्यमलेपकः ।। १७

शुद्धश्चिन्मात्र आत्मायमाकाशादप्यणोरणुः ।

स्वानुभूत्यंशमात्रं हि खवद्राम न नश्यति ।। १८

न जायते न म्रियते क्वचित्किंचित्कदाचन ।

जगद्विवर्तरूपेण केवलं ब्रह्म जृम्भते ।। १९

सत्यमेकं पदं शान्तमादिमध्यान्तवर्जितम् ।

भावाभावविनिर्मुक्तमिति मत्वा सुखी भव ।। २०

सर्वापदां निलयमध्रुवमस्वतन्त्र-

मासन्नपातमविवेकमनार्यमज्ञम् ।

बोधादहंकृतिपदं सकलं विमुच्य

शेषे सुबद्धपदमुत्तमतां प्रयासि ।। २१

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० निर्वाणप्रकरणे पू० मिथ्यापुरुषोपाख्यानं नाम त्रयोदशोत्तरशततमः

सर्गः ।। ११३ ।।